**209**

**III**

Total No. of Questions – 16

Total No. of Printed Pages – 4

Regd. No.

**Part – II**

**SANSKRIT, Paper - II**

**(Second Language)**

*Time : 3 Hours ]* *[ Max. Marks : 100*

**Note :** (1) All questions should be attempted.

(2) Question Nos. **1, 2 & 3** should be answered either in the medium of instructions of the candidate or in Sanskrit (Devanagari Script).

(3) The remaining questions should be answered in Sanskrit (Devanagari Script) only.

सूचना : प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः ।

1. एकस्य श्लोकस्य प्रतिपदार्थं भावं च लिखत । $1 \times 8 = 8$

(अ) दानं धर्मश्च विद्या च रूपं शीलं कुलं तथा ।
सुखमायुर्यशश्चैव नव गोप्यानि यत्नतः ।।

(आ) परप्राणपरित्राणपरः कारुण्यवान् भवेत् ।
मांसं कपोतरक्षायै स्वं श्येनाय ददौ शिबिः ।।

2. एकं निबन्धप्रश्नं समाधत्त । $1 \times 6 = 6$

(अ) मधुरापुराधिदेवता वचनानि लिखत ?

(आ) हरिश्चन्द्रः सत्यमेव जयते इति कथं निरूपितवान् ?

3. एकं निबन्धप्रश्नं समाधत्त । $1 \times 6 = 6$

(अ) बाणभट्टः अनाथपरिपालनकथां कथं वर्णितवान् ?

(आ) दधीचेः दानगुणमधिकृत्य लिखत ।

4. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) आश्रमपदे रामः सीता लक्ष्मणः च कथं स्थिताः ?

(आ) वासुकिना गरुत्मान् किमिति अभिहितः ?

(इ) पार्वती तपः कथम् आचरति ?

(ई) राज्यं नाम कीदृशम् ?

(उ) किमर्थं गरुडेन देवलोकात् अमृतवृष्टिः पातिता ?

(ऊ) ऐरावताधिरूढः देवेन्द्रः किमर्थं प्रतीक्षते ?

5. द्वयोः ससन्दर्भं व्याख्यानं लिखत : $2 \times 3 = 6$

(अ) मनोरथो महानेषः भगीरथ ! महारथ !

(आ) किमिवान्यत्कलिरेक एव धन्यः ।

(इ) ब्रह्मर्षिणा तेन जितोऽस्मि सत्यम् ।

(ई) ननु भोः मातुः, शिशुं मा भिदः ।

6. द्वयोः ससन्दर्भं व्याख्यानं लिखत । $2 \times 3 = 6$

(अ) अहो प्रभावः तपसाम् ।

(आ) भवन्तमभिषेक्तुम् आगतम् मया ।

(इ) मनः एव मनुष्याणां कारणं बन्धमोक्षयोः ।

(ई) मन्ये इदं मम परमं सौभाग्यम् ।

7. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) हरः गङ्गां किं प्रति विससर्ज ?

(आ) विश्वकर्मा किमर्थं खड्गं व्यरचयत् ? कस्मै प्रादात् ?

(इ) कस्मात् युधिष्ठिरः नरकक्लेशं ददर्श ?

(ई) किं त्यागेनैव उपलभ्यते ?

(उ) विश्वामित्रः हरिश्चंद्राय किं ददे इति अवदत् ?

(ऊ) विश्वसृट् कुतःपूजां न स्वीकुर्यात् ?

8. त्रयाणां प्रश्नानां समाधानं लिखत । $3 \times 2 = 6$

(अ) बाणभट्टेन विरचितं काव्यद्वयम् किम् ?

(आ) मेघानां गणस्य नाम किम् ?

(इ) वीरः कः ? सः किमर्थं भूमण्डले निवसति ?

(ई) कदा नरेन्द्रस्य विस्मयः द्विगुणः अजायत ?

(उ) चूडाला स्वपतिदेवं किमिति अवदत् ?

(ऊ) विष्णोः वचनं श्रुत्वा इन्द्रः किमवदत् ?

9. **एकेन** वाक्येन समाधानं लिखत । $5 \times 1 = 5$

(अ) सर्वलोक पितामहः कः ?

(आ) मधुराविजयस्य कर्त्री का ?

(इ) बलियाच्चापरः पुरुषोत्तमः किं प्राप ?

(ई) सर्वरोगक्षयः केन भवति ?

(उ) पुष्पविलापः संस्कृते केन अनूदितः ?

10. **एकेन** वाक्येन समाधानं लिखत । $5 \times 1 = 5$

(अ) विहगराजः राजानम् उद्दिश्य कां पपाठ ?

(आ) गोविन्दपट्टाभिषेकः कस्मात् ग्रन्थात् स्वीकृतः ?

(इ) केन करः प्रेषितः ?

(ई) सिद्धपुरुषः कः ?

(उ) शिखिध्वजस्य भार्या का ?

11. अधोनिर्दिष्टां कथां पठित्वा प्रश्नानां समाधानानि दत्त । $5 \times 1 = 5$

उज्जयिन्यां भट्टिः नाम कोऽपि ब्राह्मणः आसीत् । तस्य अभयाम्बा नाम भार्या, कमलाकरो नाम तनयः च आस्ताम् । एकपुत्रौ तौ दम्पती कमलाकरे नितान्तं प्रेमवन्तौ बभूवतुः । सः तु शरीरम् अलङ्कृत्य विद्यापराङ्मुखः विषयोन्मुखः च अभवत् । तथाविधं तम् आहूय भट्टिः कदाचिदेवम् उपदिदेश –

"मानवकुले जन्म महता पुण्येन लभ्यते । तत् लब्ध्वा अपि त्वमेवं दुर्वृत्तः असि । किञ्च तवायं विद्याभ्यासस्य कालः । इदानीं यदि विद्यां नाभ्यस्यसि तर्हि पश्चात्तव महासन्तापः भविष्यति । अपरं च यावत् अहं जीवामि तावत्त्वया विद्या अभ्यसनीया । पश्चात्तु सा दुर्लभा भवेत् ।"

**प्रश्ना :**

(1) उज्जयिन्यां कः आसीत् ?

(2) भट्टेः भार्यायाः नाम किम् ?

(3) भट्टेः तनयस्य नाम किम् ?

(4) का पश्चात् दुर्लभा भवति ?

(5) किं महता पुण्येन लभ्यते ?

12. नामनिर्देशपूर्वकं **त्रीणि** सन्धत्त । $3 \times 2 = 6$

(अ) शरत् + चन्द्रः (आ) तत् + टीका

(इ) षट्+ वारम् (ई) जगत् + नाथः

(उ) रामः + करोति (ऊ) वृक्षः + फलति

13. नामनिर्देशपूर्वकं **त्रीणि** विघटयत । $3 \times 2 = 6$

(अ) अरीञ्जयति (आ) आकृष्टः

(इ) सुबन्तम् (ई) वाङ्महिमा

(उ) नमस्ते (ऊ) गुरुर्जयति

14. **द्वयोः** शब्दयोः सविभक्तिं रूपाणि लिखत । $2 \times 6 = 12$

(अ) भिषक् (आ) सम्पद्

(इ) मनस् (ई) यद् (स्त्री)

15. समासनामनिर्देशपूर्वकं **त्रीणि** विग्रहवाक्यानि लिखत । $3 \times 2 = 6$

(अ) उपकृष्णम् (आ) पूर्वकायः

(इ) भोज्योष्णम् (ई) सप्तरात्रम्

(उ) विशालाक्षी (ऊ) पितरौ

16. अधोरेखाङ्कितपदं शुद्धीकृत्य वाक्यं लिखत । $5 \times 1 = 5$

(अ) उपाध्यायः पाठान् पाठयन्ति ।

(आ) बालः गृहाणि अगच्छन् ।

(इ) तौ चित्रं पश्यन्ति ।

(ई) युवां जलं पास्यथ ।

(उ) वयं विपणिं गमिष्यामि ।